
# ॥ काव्यप्रकाशाचमनम् ॥

## (द्वितीयाचमनम्)

७ तः १० उल्लासानां सरलसंस्कृतव्याख्या



श्रीसोमनाथसंस्कृतयुनिवर्सिटी

वेरावलम् - गुजरातम्

- प्रा. ललित पटेलः

- प्रा. पङ्कजः रावलः

# ॥ काव्यप्रकाशाचमनम् ॥

## द्वितीयाचमनम्

(७ तः ९ उल्लासानां सरलसंस्कृतव्याख्या)

SHREE SOMNATH SANSKRIT UNIVERSITY
S.S.S.U. LIBRARY ACC. No. 74090
VERAVAL

**प्रेरणास्रोतांसि एवं मार्गदर्शकाः**

श्रीकुलपतिवर्याः

प्रॉ. पङ्कज एल. जानीजीमहाभागाः

**मार्गदर्शकाः**

प्रधानाचार्याः

डॉ. नरेन्द्र एल. पण्ड्यामहाभागाः

**लेखकौ**

ललितः पटेलः - पङ्कजः रावलः च

(अध्यापकौ)

श्री सोमनाथसंस्कृतयुनिवर्सिटी- सञ्चालित-संस्कृत कॉलेज, वेरावलम्

**प्रकाशनम्**

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

जूनागढजनपदम्, गुजरातम् - ३६२ २६६.

दूरभाषः - ०२८७६ - २४४५२८, २९, ३२ फेक्स : २४४४१७

e-mail : sssu.veraval@gmail.com,

www.shreesomnathsanskrituniversity.info

**प्रकाशकः** -

**डॉ. विष्णुः पुरोहितः**

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५

जुनागढजनपदम् (गुजरात)

**प्रथमं संस्करणम्** - फरवरी, २०१३

ISBN -13 978-81-925721-4-7

S U-Library
Veraval
Acc No: 21090
...o : ..............
...e : 2006......

U LIBRARY
Computer Entry
...ord ID 6720
of Entry 07/03/2018

**मूल्यम्** - रु. १००/-

**मुद्रकः** -

एच्च. के ओफसेट, वेरावलम्

# अनुक्रमणिका

SHREE SOMNATH SANSKRIT UNIVERSITY
S.S.S.U.
LIBRARY
ACC. No.
14090
VERAVAL

| विषयः | पृष्ठसंख्या |
| --- | --- |
| * शुभाशंसनम् | ५ |
| * पुरोवाचः | ६ |
| * प्रस्तावना | ७ |
| * साहित्यशास्त्रे सम्प्रदायाः | ९ |
| * आचार्यमम्मटस्य जीवनं समयः कृतयः च | १२ |
| * काव्यप्रकाशग्रन्थकर्तृत्वसमस्या | १५ |
| * अथ सप्तमोल्लासः (दोषदर्शनः) | १८ - ३५ |
| - दोषसामान्यलक्षणं तथा च काव्यदोषस्वरूपम् | १८ |
| - पददोषाः | १९ |
| - वाक्यदोषाः | २३ |
| - अर्थदोषाः | २५ |
| - अर्थदोषाणाम् अपवादाः | २८ |
| - रसदोषाः | ३० |
| - रसदोषाणाम् अपवादाः | ३३ |
| - रसविरोधपरिहारस्य उपायाः | ३४ |
| - रसविरोधस्य अपवादाः | ३५ |
| * अथ अष्टमोल्लासः (गुणनिर्णयः) | ३६ - ४२ |
| - गुणालङ्कारयोः भेदः | ३६ |
| - भट्टोद्भटस्य खण्डनम् | ३८ |
| - वामनाचार्यस्य खण्डनम् | ३८ |
| - गुणानां भेदाः | ३९ |
| - वामनोक्तशब्दगुणानां खण्डनम् | ३९ |
| - वामनोक्तानाम् - अर्थगुणानां खण्डनम् | ४० |
| - गुणानां व्यञ्जकवर्णाः | ४१ |
| - वर्णादीनां व्यञ्जकतायाम् अपवादः | ४२ |

# ॥ शुभाशंसनम् ॥

**"देवस्य पश्य काव्यं न ममार न जीर्यति"**

केवलं परमात्मनः काव्यं वैदिकसाहित्यम् एव न हि प्रत्युत तत्संकेतेन लौकिक-संस्कृतकाव्येन सह तत्सिद्धान्तप्रतिपादकं काव्यशास्त्रमपि निरन्तरं जीवति यदि यत्नः सदैव क्रियते । तद्रक्षणाय अभ्यासः अपेक्षितः वर्तते । अन्यत् च कथनीयम् अस्ति यत् प्राप्तं ज्ञानं तु कस्यचित् जनस्य तस्यैव स्वान्तःसुखाय भवति परन्तु प्रकाशितं ज्ञानं लोकसुखाय अपि भवति । श्रीसोमनाथसंस्कृतविश्वविद्यालयः पाठ्यपुस्तकानां लेखनाय सदैव अत्रस्थान् विदुषः प्रेरयति; येनास्माकं छात्राणाम् अध्ययन सौविध्यम् जायेत । अस्यैव फलमस्ति यत् अद्य श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य **"स्वर्णिमगुजरातजयन्ती"**-अवसरे तथा बेङ्गलूरुनगरे आयोजितायां **विश्वसंस्कृतपुस्तकमेलायां** कतिपयानां पाठ्यपुस्तकानाम् अन्येषामपि सन्दर्भग्रन्थानां प्रकाशनं भवति । एतत् प्रकाशनं विलोक्य हर्षो मे जायते । अस्याम् एव श्रृङ्खलायां एतदपि **"काव्यप्रकाशाचमनम्"** काव्यशास्त्रीयं पुस्तकम् आचार्यकक्षायाः (साहित्यस्य) छात्राणां कृते **श्री ललित पटेल**-महोदयेन तथा च **श्री पङ्कज रावल** महोदयेन यत् संपादितम् वर्तते - तस्य प्रकाशनं विलोक्य प्रसन्नता मयि जायते, अत्र सप्तमोल्लासप्रभृति-दशमोल्लासगताः काव्यप्रकाशस्य विषयाः छात्राणाम् उपयोगाय सरल-शैल्यां निरूपिताः वर्तन्ते । अस्य सफलतायै कामनां कुर्वन् अहं अस्य ग्रन्थस्य निर्देशकमहोदयानां कृते तथा च सम्पादकानां कृते वर्धापनं, शुभाशंसनम् च ददामि ।

"वेदः स्वस्ति"

**प्रॉ. पङ्कज एल. जानी**

कुलपतिः

# ॥ प्रस्तावना ॥

**कृतं श्रीमम्मटाचार्यवर्यैः वाग्देवतावरैः।**
**काव्यप्रकाशपीयूषं वहतु मे सदा हृदि॥**

आचार्यभरतात् प्रारब्धा साहित्यशास्त्रधारा कविराजजगन्नाथपर्यन्त-अजस्त्र-प्रवाहिता आसीत्। तत्र गङ्गारूपा काश्मीरी-परम्परा तथा च यमुनारूपा मालवपरम्भ्परा। तत्रापि काव्यप्रकाशः पवित्रनिर्झरवत् लब्धप्रतिष्ठितः ग्रन्थः। वाग्देवतावतारध्वनि-पुनःप्रतिष्ठापकराजानकमम्मटाचार्येण रचितः काव्यप्रकाशः दुर्गमः तथापि साहित्यशास्त्रज्ञानाय एकं प्रस्थानम्। काव्यप्रकाशस्य टीकाकारेण महेश्वरभट्टाचार्येण उक्तम् -

**काव्यप्रकाशस्य कृता गृहे गृहे**
**टीकास्तथाप्येष तथैव दुर्गमः।**

व्याकरणशास्त्रे यद् स्थानं पतञ्जलिना रचित-महाभाष्यस्य, वेदान्ते यद् स्थानं शङ्कराचार्येण रचितशारीरिकभाष्यस्य च तद् स्थानं साहित्यशास्त्रे मम्मटकृत-काव्यप्रकाशस्य प्रतिष्ठितम्। वाग्देवतावतारश्रीमम्मटभट्टप्रणीतः काव्यप्रकाशोऽयम् अलङ्कारशास्त्रग्रन्थेष्वेकतमो निबन्धः। साहित्यशास्त्रस्य सर्वेऽपि विषयाः प्राय अत्र प्रतिपादिताः। एतस्य ग्रथस्य उपरि बह्वयो टीकाः संवृताः। प्रायः भारते सर्वेषु विश्वविद्यालयेषु अयं ग्रन्थः आचार्यशास्त्रिपरीक्षासु पाठ्यते। अतः बालानां सुखबोधाय पठनयोग्यम् एकं सन्दर्भसाहित्यं सरल-संस्कृतमाध्यमेन आवाभ्यां प्रकाशनीयम् इति निर्णयः कृतः। यदा आवां कक्षायां काव्यप्रकाशं पाठयावः स्म तदा आवाभ्यां चिन्तितं यद्-केन प्रकारेण छात्राः ग्रन्थं सम्यग् अवगच्छेयुः ? केन प्रकारेण आवाभ्यां पाठनीयम् ? केन प्रकारेण च आवयोः पाठनं रसमयं भवेत् ? इति।

तेषां प्रश्नानां समाधानाय अत्र प्रायः सर्वेऽपि विषयाः सरलया सरसतया च आवाभ्यां चर्चिताः। विदुषां कृते एषः यत्नः न, अपि तु अनेन काव्यप्रकाशाचमनेन विद्यार्थिनाम् उपकारः भविष्यति इति आशास्महे। क्व काव्यप्रकाशग्रन्थः क्व चाल्पविषया मतिः आवयोः। काव्यप्रकाशाचमनं कर्तुं कुत्रापि एतस्य दुर्गमग्रन्थस्य विचारान् प्रकटीकर्तुं व्युत्पत्तिन्यूनतया यदि दोषाः अभविष्यन् तर्हि तान् दूरीकृत्य क्षन्तव्यौ आवाम्।

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मा. कुलपति **श्री पङ्कज एल. जानीजी** महाभागेभ्यो धन्यवादान् वितरावः, येषां प्रेरणयाऽध्यापनादि-विविध-कार्यव्यग्रोऽपि अस्य पुस्तकस्य लेखने संलग्नौ अभवाव। आचार्य **डॉ. नरेन्द्रकुमार एल. पण्ड्याजी** महाभागेभ्य अपि धन्यवादान् प्रयच्छावः, येषां मार्गदर्शनेन गूढाः विषयाः अपि स्फुटीभूताः। **डॉ. देवेन्द्रनाथ पाण्डेयजी** महाभागान् कथं विस्मरेव? मुहुर्मुहुः तेषां मार्गदर्शनं साहाय्यं च प्राप्तमेव। सङ्गणकक्षेत्रे येषां महती गतिः तान् हमीरभाईआहिरवर्यान् धन्यावादान् समर्पयावः, यैः झटिति समयानुगुणं मुद्रणं सम्पादितम्। सरस्वत्याः कृपा सदा विलसेत् इत्याशया इत्युक्त्वा विरमावः।

**लेखकौ**

ललितपङ्कजौ